IJFMR International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# मैथिलीभाषायां पाणिनिधातुपाठस्य प्रभावः

**डॉ० ऋद्धि नाथ झाः**

(सहायकप्राचार्यः)

शिक्षाशास्त्रविभागः, का०सिं०द०सं०वि०वि० दरभङ्गा।

सम्पूर्णे विश्वे याः भाषाः सन्ति तासु सर्वासु भाषासु संस्कृतभाषा एव प्रथमा विद्यते।[1] मुख्यत इदानीं भारतस्य साहित्यिकी, सांस्कृतिकी, धार्मिकी, आध्यात्मिकी, राजनैतिकी ऐतिहासिकीप्रभृतयः जीवनव्यवस्थापि अनया भाषयैव प्राप्यते। ग्रीक्-लैटिन-जर्मनादीनां विविधानां भारोपीय भाषाणामियं जननीत्वेनाङ्गीक्रियते। अस्याः मूलं वेदः, यस्य च प्रधानाङ्गत्वात् पाणिनीयं व्याकरणं मुखस्थानीयम्।[2] भारते याः प्रान्तीय भाषाः तासु बाहुल्येन संस्कृतशब्दाः प्राप्यन्ते। एषा ह्यनादिकालात् प्रवर्त्तमाना वर्त्तते।

समये-समये अस्याः स्वरूपे वैविध्यं समागतम्, यथा- वैदिकं संस्कृतं लौकिकं संस्कृतञ्च। लौकिकं वैदिकात् किञ्चिद् भिन्नं भवति। तत्र सर्वप्रथमं लौकिकानां प्रयोगः भाषाविशेषार्थे रामायणे दृष्टिगोचरो भवति।[3] यदा अस्याः भाषायाः प्रयोगे न्यूनत्वं समागतं तदा पालि-प्राकृतापभ्रंशादयो व्यावहारिकी भाषा जाता। प्राकृताद् भेदप्रदर्शनाय संस्कृतस्य प्रयोगः भाषायै कृतः।[4]

अनुमीयते यत् शुद्ध-संस्कारयुक्तत्वादस्याः भाषायाः नाम संस्कृतमिति जातम्। यतो दृश्यतेऽपि यदेषा पाणिनीयप्रभृति व्याकरणानां नियमसंस्कारेण युक्तास्ति। अस्याः विकासः पारम्पर्यक्रमान्मन्यते। यस्य द्विविधं स्वरूपं ज्ञायते- तात्कालीनजनसामान्यस्य भाषा रूपे साहित्यभाषा रूपे चेति।

पूर्वं तु वाग्व्यवहारस्यापि भाषा संस्कृतमेवसीत्, पश्चाच्च क्षेत्रीयाः जाताः, यस्य समर्थकाः जैनबौद्धादय आसन्। तद्विपरीतमेषा निरन्तरं विकासपथे प्रवृत्ता। सहैव, पाणिनिप्रभृति व्याकरणान्यपि इमां यथेष्टरूपेण नाबद्धं कृतानि। धर्म-दर्शन-कथादीनां निर्माणाय संस्कृतमेव मतैक्येन स्वीकृतमासीत्।

पूर्वन्तु दक्षिणभारते संस्कृतं प्राकृतञ्च पूर्णरूपेण स्थानं न गृहीतं परं शनैः-शनैः द्राविड़ैरङ्गीकृतं, तत्फलस्वरूपं तेलगू, कन्नड़, मलयालम-आसां तिसृणां भाषाणां साहित्यं संस्कृतस्य तत्समैः तद्भवैश्च शब्दैः परिपूर्णं जातम्। एवंप्रकारेण संस्कृतभाषा भारतस्य सर्वासु भाषासु स्वाधिपत्यं स्थापयत्। तस्मिन्नेव क्रमे प्राकृतस्यैका विभाषा प्रादुरभूत्, या अपभ्रंशेति नाम्ना प्रसिद्धा।

वैदिकलौकिकयोरित्यनयोर्द्वयोः रूपयोः, भाषायां, छन्दसि, अलङ्कारे स्वरे च भिन्नत्वं जातम्। तत्र वैदिके संहितानां ब्राह्मणानाञ्च तथा लौकिके वाल्मीकि-रामायणस्य महाभारतादीनाञ्च रचनाः जाताः। अनयोर्द्वयोः प्रयुक्तस्वरूपयोरपि भिन्नत्वं दृश्यते-

| **वैदिके** | **लौकिके** |
|---|---|
| देवासः | देवाः |
| जनासः | जनाः |
| देवेभिः | देवैः |
| मिनीमसि | मिनीमः |

[1] **‘सा प्रथमा संस्कृतिर्विश्ववारा’**- यजुर्वेदः- 7.14

[2] **‘प्रधानञ्च षट्त्स्वङ्गेषु व्याकरणम्।’**- महाभाष्यम्- पस्पशाह्निकम्।

[3] **यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्। रावणं मन्यमाना मां सीता भीता भविष्यति।।**- वाल्मीकिरामायणम्- 5.30.18

[4] **संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः।**- काव्यादर्शः- 1.33

भाषाविज्ञानदृष्ट्या संस्कृतम् आर्यपरिवारस्य भाषा विद्यते, यद्धि भारोपीय परिवारोऽपि कथ्यते। यस्य शतं केन्तुञ्चोभे द्वे विशिष्टे शाखे भवतः। पूर्व्यामपि प्रमुखौ द्वौ वर्गौ स्तः- भारतीयो वर्गः ईरानी वर्गश्च। भारतीय वर्गे वैदिकं संस्कृतं, लौकिकं संस्कृतं तथा आभ्यामुद्भूताः हिन्दी, वङ्ग, गुर्जरीत्यादयः अनेकाः भारतीयभाषाः सन्ति। ईरानी वर्गे च ईरानी भाषा तथा तदुत्पन्नाः फ़ारसी, पश्तो इत्यादयः। भारतीयवर्गस्य प्राचीनतमं रूपम् ऋग्वेदे मिलति। आर्यपरिवारस्य अन्यासामपि भारतीयभाषाणां मूलं वैदिकं संस्कृतमेव मन्यते। ईरानी इत्यस्य प्राचीनतमं रूपं जेन्द अवेस्ता इत्यत्र निहितमस्ति। पश्चिमायां शाखायां नव वर्गाः सन्ति यत्र यूरोपस्य सर्वाः भाषाः सम्मिलितास्सन्ति।

भारोपीयपरिवारस्य द्वयोः शाखयोः एवं तयोः वर्गयोः भाषयोः किञ्चित् ईदृश्यः समानताः प्राप्यन्ते यैरिमाः एकस्यैव परिवारस्य भाषाः मन्यन्ते। या हि कालान्तरे अज्ञाताः जातास्तथा देशानां जलवायु-भिन्नत्वकारणादन्यकारणाच्च उच्चारणध्वनौ पृथक्त्वं जातम्।

यद्यपि वैदिकं संस्कृतं लौकिकं संस्कृतञ्च भाषाविज्ञानदृष्ट्या समाने एकवर्गीये च भाषे स्तः। तथापि द्वयोः व्याकरणगता बह्व्यः असाम्यताः सन्ति। द्वयोः साहित्यिकदृष्ट्यापि बह्व्यो भिन्नताः दृश्यन्ते।

निश्चितोऽयं सिद्धान्तोऽस्ति यत् वाग्व्यवहारस्य भाषा साहित्य-रचनायाश्च भाषा मिथः बहुविधं भिन्नत्वं स्थापयतः। पूर्वकाले साहित्यिक रचनायाः अनुष्ठानादीनाञ्च भाषा वैदिकी तथा वाग्व्यवहारस्य लौकिकी, या किञ्चित् परिष्कृता व्याकरणादिनियमानाबद्धा चासीत्। यतः भाषायाः सम्यगुच्चारणमपि एका कठिना साधना भवति, अन्यथा विपरीत फलागमस्य सम्भावना जायते।(5)

प्रतीयते यल्लौकिकभाषामेव साहित्य-सर्जनाय व्याकरणनियमेष्वाबद्ध्य अन्येन प्रकारेणापि वा शिष्टं तथा सर्वविधभावाभिव्यक्तये योग्यं कर्तुं संस्कृतमिति नाम्ना प्रयोगः कृतो महर्षिभिः। तेन कालान्तरे लौकिक इति शब्दस्य स्थाने संस्कृतमिति प्रचरितम्। यथा ह्युक्तं यास्केन- **भाषायामन्वध्यायनञ्च**(6) इति। एवमेव पाणिनिनापि लोकव्यवहारे आगतायाः बोली इत्यस्याः नाम केवलं भाषा इत्युक्तम्- **भाषायां सदवसस्नुवः**(7) इति।

भाषविज्ञानदृष्ट्या भारोपीय परिवारस्यान्तर्गते भारतीय राज्येषु राष्ट्रभाषां हिन्दीमतिरिच्य विविधाः क्षेत्रीयाः भाषाः उद्यन्ते, यास्तु भारोपीय परिवारानुरूपमेव। भारतीय राज्येषु बिहारोऽपि मुख्यं राज्यमस्ति। अस्य आधिकारिक्यः भाषास्सन्ति- हिन्दी, मैथिली उर्दू च। अत्र भाषागता समृद्धिः पारम्पर्येण प्राप्ता, यत्र नैका अपितु पञ्च-पञ्च मुख्याः भाषाः सम्मिलितास्सन्ति। आसां सर्वासां भाषाणाम् इतिहासः गौरवान्वितो विद्यते। इमाः पञ्च भाषाः सन्ति- मैथिली, भोजपुरी, अङ्गिका, मगही बज्जिका चेति। वस्तुतः बिहारो मुख्यतः मैथिली, भोजपुरी अङ्गिका चैतासां भाषाणां कृते परिज्ञायते। अत्राभिव्यक्तेः मुख्यो मार्गो भवति- हिन्दी, परञ्चैतदतिरिक्तं मैथिली, भोजपुरी, अङ्गिका, मगही, वज्जिका, सन्थाली, मुंडारी इत्यादयः (बोली) अपि ब्रुवते। अत्रत्यां हिन्दीभाषायां क्षेत्रगतं वैविध्यं प्राप्यते। यथाहि- उत्तर-पूर्वस्मिन् मैथिली, उत्तर-पश्चिमायाम् भोजपुरी, दक्षिण-पूर्वस्मिन् अङ्गिका, दक्षिणपश्चिमायां मगही भाषाः प्रामुख्येन उद्यन्ते। अत्र वाग्व्यवहारे सर्वासु भाषासु शब्दाः मिश्रिता वर्तन्ते।

मैथिलीभाषा आर्यपरिवारस्य भाषा विद्यते। अस्याः लिपि मिथिलाक्षरं, वैदेही तिरहुता वास्ति या देवनागर्यां बह्वी लोकप्रिया अस्ति। पूर्वमियं मिथिलाक्षरे कैथ्यां वा लिप्यां लिख्यते स्म, या बङ्गलिप्याः असमिया इति लिप्याः वा किञ्चित् साम्यं स्थापयति। परमिदानीं देवनागरी लिप्यां लिख्यते। मुख्यरूपेणेयं मिथिलाञ्चलक्षेत्रस्य भाषा अस्ति, या दरभङ्गा, मधुबनी, समस्तीपुर, मुजफ्फरपुर, सीतामढ़ी, शिवहर, बेगूसराय, अररिया, सुपौल, वैशाली, सहरसा इत्यादिषु मण्डलेषु उद्यते। अस्याः भाषायाः वक्तारः प्रायः नव कोटि जनाः सन्ति।

अस्याः प्रारम्भः ज्योतीश्वर ठक्कुरस्य रचना वर्णरत्नाकरेण मन्यते। महाकवि विद्यापतिरपि मैथिलीसाहित्यस्य प्रमुख रचनाकारोऽस्ति, यस्य प्रमुखाः रचनाः सन्ति- कीर्तिलता, कीर्तिपताका, पुरुषपरीक्षा, गोरक्षाविजय, पदावली चेति। मैथिल्याः प्रथमं स्रोतः वाल्मीकिरामायणतः प्राप्यते। यत्र मिथिलानरेशस्य राज्ञो जनकस्य राजभाषा मैथिली आसीति। सम्प्रति एषा भाषा भारतीय संविधानस्य अष्टम्याम् अनुसूच्यां 22 दिसम्बर 2003 तः 92तम संविधानसंशोधनेन विराजमाना अस्ति।

---

[5] **दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।-** महाभाष्यम्- पस्पशाह्निकम्।

[6] निरुक्तम्- 1.4

[7] अष्टाध्यायी- 3.2.108

कस्या अपि भाषायाः विपुलता तस्याः शब्दभाण्डागारेण परिलक्ष्यते। तत्र शब्दानां विविधानि रूपाणि- संज्ञा, सर्वनाम, अव्ययं, क्रियाप्रभृतीनि। एषां समेषाम् आख्यातजत्वस्वीकारे निर्माणे मुख्यरूपेण धातूनां सर्वाधिकी भूमिका वर्त्तते, या हि व्याकरणप्रक्रियया सम्पद्यते। पाणिनीयं व्याकरणं हि पञ्चाङ्गत्वेन प्रथितमस्ति। व्याकरणस्य पञ्चाङ्गेषु धातुपाठस्य महत्त्वं सर्वैरपि विपश्चिदपश्चिभिरुरीकृतमस्ति।(8) तेन धातोः महत्ता सर्वत्र विराजिता जायते। शाकटायनमते सर्वाणि नामानि आख्यातजानि किं वा धातुजानि सन्ति। निरुक्तकारोऽपि आख्यातज-सिद्धान्तं स्वीकरोति।(9) पाणिनीय व्याकरणानुसारेण क्रियावाचिनो भ्वादयो एव धातुसंज्ञका भवन्ति। अतएव सिद्धं भवति यत् क्रियाबोधका धातव एव। क्रियाया एवापरं नाम भावो भावना- उत्पादना व्यापारश्च। कौण्डभट्टेनापि प्रोक्तम्- **'व्यापारो भावना सैवोत्पादना सैव च क्रिया।'**(10)

यास्केन आख्याते= तिङन्ते भावस्यैव प्रधानता स्वीकृता विद्यते- **'भावप्रधानमाख्यातम्।'**(11) शाब्दबोधप्रसङ्गे शाब्दिकैः व्यापारमुख्यविशेष्यकः शाब्दबोधोऽङ्गीक्रियते। एवं महिमामण्डितस्य धातुपाठस्य यदि सूक्ष्मरीत्या विवेचनं भवेत्तदा अस्योपयोगिता न केवलं संस्कृतवाङ्मये, अपितु संस्कृतान्निःसृतासु विभिन्नासु भाषास्वपि जायेत। ताश्च भाषाः वाक्यपदीयकारदिशा अशक्तैरभिधातृभिः सम्पोषिताः, तेन दैवीवाग् व्यवकीर्णा जाता।(12)

सम्प्रति व्याकरणस्य याः प्रक्रियाः प्रचलन्ति ताः सर्वाः पाणिनीयं धातुपाठमेवाश्रित्यैव प्रवर्तन्ते। मूलपाणिनीयधातुपाठस्तु सम्प्रति नोपलभ्यते तथाप्यस्य विद्वद्भिः स्वीकृतोऽनुमोदितश्च त्रिविधः पाठः दृग्गोचरो जायते। तद्धि क्षीरस्वामिकृता क्षीरतरङ्गिणी, सायणाचार्यकृता माधवीयाधातुवृत्तिः भट्टोजिदीक्षित-कृतो वैयाकरणसिद्धान्तकौमुद्याः तिङन्त-भागश्चेति। एषु त्रिषु यद्यपि सर्वप्राचीनो ग्रन्थः क्षीरतरङ्गिणी विद्यते तथापीदानीं माधवीयाधातुवृत्तेः सिद्धान्तकौमुद्यास्तिङन्तभागस्यैव च सर्वग्राह्यता दृश्यते। एषु त्रिषु धातूनां या सङ्ख्या सा क्रमेण एवमस्ति- 1847, 1918, 1968 इति।

सिद्धान्तकौमुद्यास्तिङन्तभागे दशसु गणेषु विभक्ताः 1968 धातवः सन्ति। यत्र धातुपाठस्य एकैकं धातुमुद्धृत्य प्रक्रिया साध्यते। अथ चान्ते कण्ड्वादिप्रकरणमप्यस्ति। किञ्च ततः पृथक्कृत्य लोके ये धातुपाठा गृह्यन्ते, तत्र वैविध्यं दृश्यते। अतः कौमुदीमाश्रित्य नव्यव्याकरणाध्येतॄणां कृते प्रक्रियासाधनावसरे काठिन्यमनुभूयते। पाणिनिधातुपाठः विज्ञानमनुबन्धानथ च स्वरानाश्रित्य प्रवर्तते।

पाणिनीयधातुपाठे ङितामनुदात्तेताञ्च धातूनाम् **अनुदात्तङित आत्मनेपदम्**(13) इति सूत्रेण आत्मनेपदसंज्ञा भवति अथ च तेभ्य आत्मनेपदिनः प्रत्यया जायन्ते। इदं कथमपि नानुबन्धस्वरानविज्ञाय शक्यते। ञितां स्वरितेताञ्च धातूनां **स्वरितञितः कर्त्रभिप्राये क्रियाफले**(14) इति सूत्रेण कर्त्रभिप्राये क्रियाफले आत्मनेपदिनः प्रत्यया, अकर्त्रभिप्राये क्रियाफले च परस्मैपदिनः प्रत्यया भवन्ति। इदमपि नानुबन्ध-स्वरानविज्ञाय शक्यते। एवमेव आत्मनेपद-परस्मैपद-निमित्ताद्धीनाः ये धातव सन्ति, तेभ्यः **शेषात्कर्तरि परस्मैपदम्**(15) इति सूत्रेण परस्मैपदिनः प्रत्यया जायन्ते। एवमेव ये धातव उदात्ताः सन्ति ते सेटः, येऽनुदात्ताः सन्ति तेऽनिट,

8 **'सकलशब्दमूलभूतत्वाद्धात्वर्थो निरूप्यते।'**- परमलघुमञ्जूषा- धात्वर्थनिरूपणम्।

9 निरुक्तम्- 01/4

10 वैयाकरणभूषणसार: कारिका- 5

11 निरुक्तम्- 01/1

12 **'दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः।'**- वाक्यपदीयम्- 1/155

13 अष्टाध्यायी- 1.3.12

14 अष्टाध्यायी- 1.3.72

15 अष्टाध्यायी- 1.3.78

इतीडागमस्य विज्ञानमपि कर्तुं न शक्यते, धातुस्वरानविज्ञाय। इत्थञ्चानुबन्धस्वरै-रात्मनेपद-परस्मैपद-उभयपदविज्ञानं भवति, धातुस्वरेण च सेडनिड्-धातूनाञ्च विज्ञानं भवति। इदमपि न शक्यतेऽनुबन्धस्वरानविज्ञाय।

अतएव धातून् पठित्वा धातुपाठे धातोरनुबन्धस्य च स्वरनिर्देशः क्रियते। यथा- एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः। फक्कादय उदात्ता उदात्तेत: परस्मैभाषाः। ष्मिङ्ङादयोऽनुदात्ता आत्मने-भाषा:। अतः अनुदातेत्=आत्मनेपदी। स्वरितेत्=उभयपदी। उदात्तेत्=परस्मैपदी। उदात्तेद्धातवः शेषत्वात्परस्मैपदिनो भवन्ति, न तूदात्तेत्तत्वात्। एवमेव उदात्त:=सेट्। अनुदात्तः= अनिट्।

इत्थंहि ये धातव उदात्तास्ते सेटः। येऽनुदात्तास्तेऽनिटः। ये धातवोऽनुदात्तेतस्ते आत्मनेपदिनः, ये स्वरितेतस्त उभयपदिनः, ये उदात्तेतस्ते शेषत्वात् परस्मैपदिनश्च सन्ति। यत्र कस्यापीत्संज्ञा न भवति, तेऽपि शेषत्वात् परस्मैपदिनः।

ननु येन प्रकारेण शब्दशास्त्रे प्रक्रियां निर्वहन् लौकिकाः वैदिकाश्च शब्दाः साध्यन्ते, तत्र क्वचित् वर्णस्य आगमनं, क्वचित् वर्णस्य विपर्ययः, क्वचित् वर्णे विकारः, क्वचित् नाशः क्वचिच्चातिशयेन धातोर्योगो जायते। आभिः प्रक्रियाभिः शब्दानां सिद्धिः कार्यते। तद्यथा चोक्तम्-

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**

**धातोस्तथार्थतिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।**(16)

एवमेव भगवान् पतञ्जलिरप्याह- **लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति।**(17) एतेषां परिवर्तनस्य स्वरूपमेवं विद्यते-

**भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।**

**गूढोऽऽत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्।**(18)

नह्येतादृशानि परिवर्तनानि केवलानि शब्देषु, अपितु धातुष्वपि दृश्यन्ते। परिवर्तनानि इमानि लौकिकैः वैदिकैश्च शब्दैः सह विविधासु भाषास्वपि दृश्यन्ते। भाषाविज्ञानमपि परिवर्तनानि इमानि स्वीकुर्वन्ति। तत्रेमानि परिवर्तनान्याधारीकृत्य मैथिलीभाषायां पाणिनीय-धातुपाठान्तर्गतानां पठितानां धातूनां कीदृशः प्रभावो वर्त्तते, एतस्य कानिचिदुदाहरणान्यधः प्रस्तूयन्ते-

**मैथिलीभाषायां पाणिनीयधातुपाठस्य प्रभावः-**

| **पाणिनिधातुः** | **अर्थः** | **प्रयोगः** | **मैथिलीधातुः** | **अर्थः** | **प्रयोगः** |
|---|---|---|---|---|---|
| शिक्ष | विद्योपादाने | शिक्षते | सिख | शिक्षा | बच्चा बाजब सिखैत छथि। |
| दृशिर् | प्रेक्षणे | दृश्यते | देख | दर्शन | राम पुस्तक देखैत छथि। |
| लिख | अक्षरविन्यासे | लिखति | लिख | अक्षरादिविन्यास | छात्र उत्तर लिखैत छथि। |
| गण | परिसंख्याने | गणयति | गन | गणन | राम रूपैया गनैत छथि। |
| मन्थ | विलोडने | मथ्नाति | मथ | मन्थन | माता दही मथैत छथि। |
| हस | हसने | हसति | हँस | हास्य | एना किये हँसैत छि। |
| दुह | प्रपूरणे | दोग्धि | दुह | दोहन | दुहाब गाय दुहै छथि। |
| त्यज | हानौ | त्यजति | त्याग | छोड़ब | हे देवदत्त क्रोध त्यागु। |
| पूज | पूजायाम् | पूजयति | पुज | पूजन | भगवती पूजल गेलीह। |
| श्रु | श्रवणे | श्रृणोति | सुन | श्रवण | देवदत्त कने एमहर सुनु। |
| गर्ज | शब्दे | गर्जति | गर्ज | जोरसँ ध्वनि करब | मेघ गर्जैत अछि। |
| पठ | व्यक्तायां वाचि | पठति | पढ़ | पठन | बच्चा किताब पढ़ैत छथि। |
| मथे/मन्थ | विलोडने | मथ्नाति | मथ | मन्थन | स्त्री सभ दूध मथैत छथि। |

16 काशिका- 6.3.108 (पृषोदरादीनि यथोपदिष्टम् इति सूत्रे)।

17 महाभाष्यम्- पस्पशाह्निकम्।

18 सिद्धान्तकौमुदी- समासाश्रयविधिप्रकरणम्।

| | | | | | |
|---|---|---|---|---|---|
| डुदाञ् | दाने | ददाति | द | दान | राजा भूखलकें अन्न देल। |
| कपि | चलने | कम्पते | कप | कम्पन | जाड़सँ देह कपैत अछि। |
| पा | पाने | पिबति | पिब | पान | बालक दूध पिबैत अछि |
| चर | गत्यर्थः/भक्षणे | चरति | चर | तृणादि-भक्षण | गाय घास चरैत अछि। |

एवंहि पाणिनीयधातुपाठान्तर्गतानां पठितानां धातूनां मैथिलीभाषायामुपरि विविधरूपेण प्रभावं द्रष्टुं शक्यते। एषः प्रभावः कुत्रचिद् ध्वनिपरिवर्तनरूपेण, कुत्रचित् वर्णपरिवर्तनरूपेण क्वचिच्च वर्णांश-परिवर्तनरूपेण द्रष्टुं शक्यते। अनेन परिवर्तनेन क्वचिद् अर्थेऽपि परिवर्तनं जायते।